Total No. of Questions : 5 ] [ Total No. of Printed Pages : 2

**Code No. : M-01**

# स्नातकपरीक्षाः—२०१४

## बि.ए. — विद्धन्मध्यमा - तृतीयवर्षः

## शास्त्रम्—अलङ्कारशास्त्रम्

### भागः - १, पत्रिका - १

### विषयः - कुवलयानन्दः

**दिनाङ्कः** - 18-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. एकेन वाक्येन उत्तरत** **8 x 10=20**

१. विरोधाभासस्य उदाहरणं किम् ?

२. सभिप्रायविशेष्ये कः अलङ्कारः ?

३. कारणं विना कार्योत्पत्तौ अलङ्कारः कः ?

४. उपमेयोपमायाः उदाहरणं किम् ?

५. अनुभयाभेदरूपकस्य किमुदाहरणम् ?

६. समर्थनीयस्यार्थस्य समर्थने कः अलङ्कारः ?

७. उत्प्रेक्षाव्यञ्जकाः शब्दाः के ?

८. परिकाराङ्कुरालङ्कारस्योदाहरणं लिखत ।

९. दोषगुणयोर्गुणदोषत्वकल्पने कः अलङ्कारः ?

१०. ‘चापेन भ्राजते सूरः शूरश्चापेन राजते’ अत्र कः अलङ्कारः ?

**II. सलक्षणोदाहरणं अलङ्कारचतुष्टयं निरूपत ।** **4 x5=20**

१. आक्षेपः २. पर्यायोक्तिः ३. अनन्वयः

४. दृष्टान्तः ५. व्याघातः ६. कारणमाला

**III. द्वयोः उत्तरं लिखत ।** **2 x 15=30**

१.सोदाहरणं परिणामालङ्कारं निरूपयत ।

२. अर्थान्तरन्यासालङ्कारं सोदाहरणं प्रतिपादयत ।

३. सोदाहरणं उल्लेखालङ्कारं निरूपयत ।

—अनुवर्तते

**IV. पद्यचतुष्टयस्य अलङ्कारं निरूप्य लक्षणं समन्वित।** **4 x 5=20**

१. यश्च बिम्बं परशुना यश्चैनं मधुसर्पिषा।
यश्चैनं गन्धमाल्याद्यैः सर्वस्य कटुरेव सः ॥

२. पिनष्टीव तरङ्गाग्रैः समुद्रः फेनयन्दनम्।
तदादाय करैरिन्दुर्लिम्पतीव दिगङ्गनाः ॥

३. हालाहलो नैव विषं विषं रमा जनाः परं व्यत्ययमत्र मन्वते।
निपीय जागर्ति सुखेन तं शिवः स्पृशन्निमां मुह्यति निद्रया हरिः ॥

४. यश्च रामं न पश्येत्तु यं च रामो न पश्यति।
निन्दितः स भवेल्लोके स्वात्माप्येनं विगर्हते ॥

५. कल्पतरुकामदोग्ध्रीचिन्तामणिधनदशङ्खानाम्।
रचितो रजोभरपयस्तेजःश्वासान्तराम्बरैरेषा ॥

६. माननस्या निराकर्तुं पादयोर्मे पतिष्यतः।
उपकाराय दिष्ट्यैतदुदीर्णं घनगर्जितम् ॥

**V. एषु द्वयोर्युग्मयोः मिथो वैलक्षण्यमुपपादयत।** **2 x5=10**

१. प्रतिवस्तूपमा – दृष्टान्तः

२. परिकरः – परिकराङ्कुरः

३. विभावना – विशेषोक्तिः

४. सङ्करः – संसृष्टिः

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : M-02**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्—अलङ्कारशास्त्रम्

### भागः - १, पत्रिका - २

## विषयः - मृच्छकटिकम् - अभिषेकनाटकं च

**दिनाङ्कः** - 19-03-2014 ] [ **गरिष्ठाङ्काः** - १००

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. चतुर्णां प्रश्ननानाम् उत्तरं लिखत।** **8 x4=32**

१. 'अभिषेकनाटकम्' इति नाम्नः औचित्यं प्रतिपादयत।

२. मैत्रेयेण दृष्टं वसन्तसेनायाः गृहं वर्णयत।

३. सीता कुतः अग्निं प्रविवेश ? तेन किमभवत् ? विशदयत।

४. आधिकरणिकस्थानं कुतः क्लेशकरम् ? अधिकरणिकः कीदृशो भवेत् ? विवृणुत।

५. शुकसारणौ कौ ? किमर्थं प्रविष्टौ ? विवृणुत।

६.चारुदत्तस्य विचारे केन मिथ्यारोपः कृतः ?विशदयत।

**II. चत्वारि सावतरणं व्याख्यात** **6 x 4=24**

१. सुखं हि दुःखान्यनुभूय शोभते घनान्धकारेष्विव दीपदर्शनम्।
सुखात्तु यो याति नरो दरिद्रतां धृतः शरीरेण मृतः स जीवति॥

२. वागुराच्छन्नमाश्रित्य मृगाणामिष्यते वधः।
वध्यत्वाच्च मृगत्वाच्च भवाञ्छन्नेनदण्डितः॥

३. समुद्रवीचीव चलस्वभावाः सन्ध्याभ्रलेखेव मुहूर्तरागाः।
स्त्रियो हृतार्थाः पुरुषं निरर्थं निष्पीडितालक्तकवत्यजन्ति॥

४. देवाः सेन्द्रादयो भग्ना दानवाश्च मया रणे।
सोऽहं मोहं गतोऽस्म्यद्य सीतायास्त्रिभिरक्षरैः॥

५. सदा प्रदोषो मम याति जाग्रतः सदा च मे निःश्वसतो गता निशा।
त्वया समेतस्य विशाललोचने ममाद्य शोकान्तकरः प्रदोषकः॥

–अनुवर्तते

**III. चतुर्णामेव सप्रसङ्गं भावार्थं प्रकाशयत।** **6x 4=24**

१. गुणः खल्वनुरागस्य कारणं न पुनर्बलात्कारः।

२. अपेयेषु तडागेषु बहुतरमुदकं भवति।

३. नृणां लोकान्तरस्थानां देहप्रतिकृतिः सुतः।

४. सर्वापराद्धेष्ववध्याः खलु दूताः।

५. अधर्मं खलु प्रच्छन्नो वधः।

६. अवश्यं युधि वीराणां वधो वा विजयोऽथवा।

**IV. पद्यानां टिप्पणीरारचयत ।** **5 x 4=20**

१. रामः

२. चारुदत्तः

३. विभीषणः

४. मैत्रेयः

५. विष्कम्भकः

६. सूत्रधारः

—०—

Total No. of Questions : 5 ] [ Total No. of Printed Pages : 2

**Code No. : M-03**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्–अलङ्कारशास्त्रम्

### भागः - १, पत्रिका - ३

### विषयः - साहित्यदर्पणः–१

**दिनाङ्कः** - 20-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

I. महिभट्टाभिमतं वस्त्वलङ्कारयोरनुमानगतार्थत्वं संसाध्य तस्य खण्डनप्रकारः प्रदर्शनीयः। **16**

**II. अधोनिर्दिष्टेषु त्रयाणां उत्तरं लिखत** **3 x10=30**

१.उद्दीपनविभावस्य परिचयो देयः ?

२. विभावानुभावव्यभिचारिणां लक्षणमभिधीयताम् ?

३. मम्मटोक्तकाव्यलक्षणं निराकुरुत।

४. साधारणीकरणव्यापारस्वीकारे वाचोयुक्तिं प्रदर्शयत।

**III. सप्रसङ्गं कारिकात्रयं व्याख्यात।** **3 x 8=24**

१. उत्साहादिसमुद्बोधः साधारण्याभिमानतः।
नृणामपि समुद्रादिलङ्घनादौ न दुष्यति॥

२. आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा।

३. एकावयवसंस्थेन भूषणेनैव कामिनी।
पदद्योत्येन सुकवेर्ध्वनिना भाति भारती॥

४. यदि संयोग एकस्मिन् प्रयोगोऽन्यः प्रयुज्यते।
तेन पात्रप्रवेशश्चेत् प्रयोगातिशयस्तदा॥

**IV. सप्रसङ्गं पद्यत्रयं व्याख्यात** **3x15=15**

१. धर्मार्थकाममोक्षेषु वैलक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम्॥

२. स्वज्ञानेनान्यधीहेतुःसिद्धेऽर्थे व्यञ्जको मतः।
यथा दीपोऽन्यथाभावे को विशेषोऽस्य कारकात्॥

३. प्रागसत्त्वाद्रसादेर्नो बोधिके लक्षणाभिधे।
किञ्च मुख्यार्थबाधस्य विरहादपि लक्षणा॥

–अनुवर्तते

४. प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः ।
अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा ॥

**V. त्रयाणां टिप्पणीरारचयत ।** **3 x 5=15**

१. शृङ्गाररसः

२. काव्यप्रयोजनम्

३. तात्पर्यवृत्तिः

४. लक्षणालक्षणम्

—०—

Total No. of Questions : 8 ] [ Total No. of Printed Pages : 1

**Code No. : M-05**

# स्नातकपरीक्षा:–२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– सामान्यभागः

### भागः - २, पत्रिका - ५

## विषयः - वैय्याकरणसिद्धान्तकौमुदी

**दिनाङ्कः** - 22-03-2014 ] **[ गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. पञ्चसूत्राणि सोदाहरणं व्याख्यात ।** **5 x 5 = 25**

१.ऋष्यन्धकवृष्णिकुरुभ्यश्च ।

२. आरगुदीचाम् ।

३. कौमारापूर्ववचने ।

४. दक्षिणापश्चात्पुरसस्त्यक् ।

५. सुपः आत्मनः क्यच् ।

५. तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् ।

**II. एषु कृदन्ते चतुर्णां तद्धितान्ते चतुर्णां च रूपसिद्धिप्रकारं सानुशासनं विवृणुत ।** **8 x 3 = 24**

१.इत्यः ७. चाक्रिणः

२. कारकः ८. पैतृष्वस्रीयः

३. स्नानीयम् ९. सौहार्दः

४. शक्यम् १०. मानुषः

५.जनार्दनः ११. ऐतिहासिकः

६. पादः १२. दाक्षिणात्यः

**III. एषु पञ्चानां प्रक्रियाः सानुशासनं लिखत** **5 x 3 = 15**

१. पुत्रीयति । २. बोभवीति । ३. वाव्रज्यते । ४. ईप्सति ।

५. विजयते ६. विरमति । ७. भाव्यते ।

**IV. कारिकामिमां व्याख्यात** **10 x 1 = 10**

१. भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्ति विवक्षायां भवन्ति मतुबादयः ॥

–अनुवर्तते

**V. अमीषां पदद्वन्द्वानां अर्थभेदं लिखत** **5 x 2 = 10**

१. वाच्यम् - वाक्यम्

२. प्रोष्ठपादः - प्रौष्ठपदः

३. पञ्चकपालः - पाञ्चकपालम्

४. उपसर्या - उपसार्या

५. शारद्वतः - शारद्वतायनः

**VI. अधोनिर्दिष्टपदानां विग्रहवाक्यं प्रदर्शयत (पञ्चानामेव)** **5 x 1 = 05**

१. रामः २. शाब्दिकः ३. नदीष्णः ४. जलधिः

५. त्रैविधः ६. प्रष्ठः ७. दशामः

**VII. अधोनिर्दिष्टानपदसम्बन्धिनं साधुप्रत्ययं चिनुत।** **5 x 1 = 05**

१. तुर्यः (क्यप्, क्यङ्, यत्)

२.ज्येष्ठः (ठन्, ठक्, इष्ठन्)

३. ग्रामता (तृन्, तल्, तृच्)

४. सामगः (ट, टक्, अण्)

५. मातृश्वस्रीयः (छण् , छ, घ.)

**VIII. इमानि व्याख्यात** **2 x 3 = 6**

१. पाणौ सृजेर्ण्यद्वाच्यः।

२. पातेर्णौ लुग्वक्तव्यः।

३. छागवृषयोरपि।

—o—

Total No. of Questions : 7 ] [ Total No. of Printed Pages : 2

**Code No. : M-06**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– सामान्यभागः

### भागः - २, पत्रिका - ६

### विषयः - न्यायसिद्धान्तमुक्तावली

**दिनाङ्कः** - 23-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. दशानामेव पदानां परिष्कृतार्थं लिखत** **1 x 10 = 10**

१. लीलाताण्डवपण्डितः। २. गुणगुम्फिता।

३. संसारमहीरुहः। ४. सादृश्यम्।

५. सामान्यम्। ६. अभावत्वम्।

७. संसर्गाभावत्वम्। ८. साधर्म्यम्।

९. पारिमाण्डल्यम्। १०. भूतत्वम्।

११. विभुत्वम्। १२.योगजधर्मः।

**II. एकवाक्येन उत्तरं लिखत (दशानामेव)** **2x 10 = 20**

१.अन्योन्याभावो नाम कः ?

२. द्रव्यत्वसाधकानुमानं किम् ?

३. आत्मत्वजातिः कथं सिद्ध्यति ?

४. वृक्षादेः शरीरत्वे किं प्रमाणम् ?

५. घ्राणेन्द्रियस्य पार्थिवत्वं कथम् ?

६. शरीरस्यैव कर्तृत्वे को दोषः ?

७. इन्द्रियत्वं नाम किम् ?

८. युक्तयुञ्जानयोः वैलक्षण्यं किम् ?

९. परममहन्त्वं नाम किम् ?

१०. प्रकृतिः कर्त्री इति के अङ्गीकुर्वन्ति ?

११. प्रागभावत्वं नाम किम् ?

१२. आकाशात्मनां साधर्म्यं किम् ?

–अनुवर्तते

**III. यथारुचि प्रश्नत्रयम् उत्तरत** **10x 3 =30**

१, मङ्गलसमाप्त्योः कार्यकारणभावं प्राचीनमतरीत्या लिखत ।

२. शक्तेरतिरिक्तपदार्थत्वमाशङ्क्य निराकुरुत ।

३. विशेषसद्भावे किं मानम् ?

४. 'पारिमाण्डल्यभिन्नानाम्' इति कारिकां व्याख्यात ।

**IV. रिक्तस्थलं योग्येन पदेन पूरयत (दशानामेव)** **1x 10 =10**

१.अत एवोऽपमानचिन्तामणौ..........अतिरिक्तपदार्थत्वमाशङ्कितम् ।

२. क्षित्यप्तेजो................मनः ।

३. सुवर्णस्य यथा तेजसि..........तथाऽग्रे वक्ष्यते ।

४. गुणक्रियादिविशिष्टबुद्धिः.........विशिष्टबुद्धित्वात् ।

५. एवं त्रैविध्यमापन्नः.........इष्यते ।

६. तद्धि स्वाश्रयारब्ध........परिमाणारम्भकम् ?

७. पारिमाण्डल्य.........उदाहृतम् ?

८. योग्यविभु..........विशेषगुणनाश्यत्वात् ।

९. भस्मनो हि.......पाषाणोपादानोपादेयत्वं सिद्ध्यति ।

१०. मधुरादिभेदेन यः ..........सः पृथिव्यामेव ।

११. आकाशस्य तु विज्ञेयः.......वैशेषिको गुणः ।

१२. त्वङ्मनसंयोगो.........कारणमित्यर्थः ।

**V. लघुटिप्पणीः लिखत (त्रयाणामेव)** **5x 3 =15**

१. न्यायसिद्धान्तमुक्तावली

२. ईश्वरानुमानम्

३. अभावः

४. अलौकिकसन्निकर्षाः

५. सामान्यम् ।

**VI. संयोजयत** **1x 5 =5**

| | | |
|---|---|---|
| १. रेचनम् | - | द्रव्यम् |
| २. उष्णस्पर्शः | - | जातिः |
| ३. आत्मा | - | गमनम् |
| ४.गुणः | - | तेजः |
| ५.द्रव्यत्वम् | - | सुखम् |

–अनुवर्तते

**VII. दशानां प्रमेयदोषान् परिहत।** **1x10 =10**

१.अलौकिकः सन्निकर्षः द्विविधः परिकीर्तितः।

२. विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि सप्तविधः।

३. समाप्तपुनरात्तत्वं हेतुदोषः।

४. पञ्चसु अन्यथासिद्धेषु मध्ये चतुर्थोऽन्यथासिद्ध आवश्यकः।

५. यत्समवेतं कार्यं भवति ज्ञेयं तु असमवायिजनकं तत्।

६. सप्तानामपि साधर्म्यं गोत्वादिकमुच्यते।

७. अभावानामधिकरणात्मकत्वं तार्किका अङ्गीकुर्वन्ति ?

८.समवाये प्रत्यक्षं प्रमाणम्।

९. अवयवाऽवयवयोः सम्बन्धः समवायः।

१०. भ्रमणरेचनस्यन्दनानि उत्क्षेपणादेव लभ्यन्ते ?

११. ईश्वरे अनुमानमात्रं प्रमाणम्।

१२. जले तु आम्ल एव रसः।

—०—

Total No. of Questions : 14(7+2+3+2) ] [ Total No. of Printed Pages : 2

**Code No. : M-07**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## सामान्यविभागः

### भागः - २, पत्रिका - ७

### विषयः - अर्थसङ्ग्रहादि

**दिनाङ्कः** - 24-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

### प्रथमः भागः

**(अस्मिन् भागे पञ्चैव प्रश्नाः समाधेयाः)** **5 x 10 = 50**

I. लोकायतमतानुसारेण तत्वानि कति ? कानि कानि ? आकाशतत्वं तैः अङ्गीकृतं वा न वा ?

II. चार्वाकमते देहातिरिक्तात्मा अस्ति वा न वा ?विशदयत ।

III. बौद्धमतस्य सारं वर्णयत ।

IV. आर्हतोक्तेन प्रकारेण स्याद्वादं निरूपयत ।

V. आर्हतमतोक्तं रत्नत्रयं वर्णयत ।

VI. साङ्ख्ययोक्तं सत्कार्यवादं स्पष्टीकुरुत ।

VII. साङ्ख्यानां मते जगतः कारणं किम् ? तत्र प्रकृतिपुरुषसम्बन्धः कथमिति विवेचयत ।

### द्वितीयः भागः

I. प्रकरणं नाम किम् ? प्रकरणं कति विधम् ? **1 x 8 = 8**

अथवा

विधेः सहकारिभूतानि षट्प्रमाणानि यथाग्रन्थं लिखत ।

II. **त्रयाणां टिप्पणीः रचयत ।** **4 x 3 = 12**

१. सन्दंशः २.आर्थीभावना ३. उत्पत्तिविधिः ४. वाक्यम्

### तृतीयः भागः

I. 'सतां त्रीणि सकृत्' तानि कानि ? कथमिति विवेचयत । **1 x 6 = 6**

II. मनुना सूचिताः स्त्रीरक्षणोपायाः के ? **1 x 6 = 6**

–अनुवर्तते

**III. द्वयोः टिप्पणीं रचयत ।** **2 x 4 = 8**

१. स्त्रीधनम्　　२.न स्त्री स्वातन्त्र्यमर्हति　　३. पुत्रः

## चतुर्थः भागः

**I.** तत्त्वप्रकाशोक्तानि तत्त्वानि कति ? तानि कानि ? **1 x 4 = 4**

**II. द्वयोः टिप्पणीं रचयत ।** **2 x 3 = 6**

१. पशुः

२. पतिः

३. अर्थपञ्चकम्

—o—

Total No. of Questions : 5 ] [ Total No. of Printed Pages : 2

**Code No. : M-08**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## सामान्यविभागः

### भागः - २, पत्रिका - ८

### विषयः -संस्कृतभाषाशास्त्रं साहित्यचरितं च

**दिनाङ्कः** - 25-3-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. रिक्तस्थानानि पूरयत।** **5 x 1 = 5**

१. प्रयोगाधिक्यं....................।

२. 'देवाः' इत्यस्य वैदिकं रूपं..........।

३. 'पुरुषः...पुरिस' इत्ययं दृष्टान्तः.......स्य।

४. 'जजान' इत्यस्य ग्रीक्रूपम्................।

५. ऋग्वेदे..........सङ्ख्याकानि सूक्तानि सन्ति।

**II. योजयत** **5 x 1 = 5**

| अ | | आ |
|---|---|---|
| १. बुद्धचरितम् | - | वृत्तिः |
| २.दिदेश | - | अश्वघोषः |
| ३. ऐतरेयब्राह्मणम् | - | देदैख |
| ४. विशाखदत्तः | - | ऋग्वेदसम्बन्धी |
| ५. भारती | - | मुद्राराक्षसम् |
| | | भामती |

**III. उत्तराणि लिखत (पञ्चनाम्)** **5 x10 = 50**

१. भाषापरिवर्तनमुद्दिश्य प्रबन्धं लिखत।

२. भाषावर्गीकरणं प्रतिपादयत।

३. ऋग्वेदसूक्तवैविध्यं प्रतिपादयत।

४. वाल्मीकिरामायणमुद्दिश्य प्रबन्धमारचयत।

–अनुवर्तते

५. कालिदासस्य देशकालादिविषयं निरूपयत ।

६. ध्वनिनियमान् प्रतिपादयत ।

७. ब्राह्मणग्रन्थानां वैशिष्ट्यं प्रतिपादयत ।

IV. **लघूत्तराणि लिखत (चतुर्णाम्)** **4 x 5 = 20**

१. कथासाहित्यस्य वैशिष्ट्यं निरूपयत ।

२.'दैवीउत्पत्तिवादं' स्पष्टयत ।

३. अर्थोत्कर्षो नाम कः ? प्रतिपादयत ।

४. 'संस्कृतभाषा जनभाषा आसीत्'आशयमिमं विशदयत ।

५. भाषालक्षणं किम् ? प्रतिपादयत ।

६. वेदाङ्गेषु 'शिक्षायाः' स्थानं स्पष्टयत ।

V. **टिप्पणीमारचयत (चतुर्णाम्)** **4 x 5 = 20**

१. मेघदूतम्

२. स्वरलोपः

३. अग्निः

४. अभिषेकनाटकम्

५. बाणः

६. मिथ्यासादृश्यम्

—०—

Total No. of Questions : 7 ] [ Total No. of Printed Pages : 1

**Code No. : M-10**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्धन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– व्याकरणशास्त्रम्

### भागः - १, पत्रिका - ३

### विषयः - प्रौढमनोरमा

**दिनाङ्कः** - Date : 20 -03-2014 ] **[ गरिष्ठाङ्काः - १००**

**समयः**- Time : 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

I. द्विरुपदिष्टस्य हकारस्य प्रजोयनं व्याख्यात । **10**

II. 'पूर्वत्रासिद्धम्' इति सूत्रं स्वतन्त्रविधिश्चेत् कुत्र दोषः ? व्याख्यात । **10**

**III. सोदाहरणं चत्वारि सूत्राणि व्याक्यात । 4 x 5 = 20**

१. षष्ठी स्थाने योगा ।

२. उपदेशेऽजनुनासिक इत् ।

३. उरण् रपरः ।

४. एत्येधत्यूठ्सु ।

५. अतो भिस ऐस् ।

६. संयोगान्तस्य लोपः ।

IV. 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रं व्याख्यात । **15**

V. 'इको यणचि'इति सूत्रं सोदाहरणं व्याख्यात । **15**

**VI. शाब्दबोधं विलिखत । 4 x 5 = 20**

१.हरिं भजति । २. वृक्षात् पर्णं पतति ।

३. रामेण बाणेन हतो वाली । ४. विप्राय गां ददाति ।

**VII. कारिकां व्याख्यात 10**

अपाये यदुदासीनं चलं वा यदि वाचलम् ।
ध्रुवमेवातदावेशात् तदपादानमुच्यते ॥

—०—

Total No. of Questions : 5 ] [ Total No. of Printed Pages : 2

**Code No. : M-33**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– द्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - १

### विषयः - उपनिषद्भाष्यम्

**दिनाङ्कः** - 18-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. यथाभाष्यं त्रीन् मन्त्रान् व्याख्यात ।** **10 x 3 = 30**

१. यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद् ।
वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् ॥

२. कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥

३. ये तत्र ब्राह्मणाः सम्मर्शिनः युक्ता आयुक्ताः ।
अलूक्षा धर्मकामा स्युः। यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथाः ।

४. तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेद् बाल्यं च पाण्डित्यं च
निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मणः ।

५. जानाम्यहं शेवधिनित्यनित्यं न ह्यध्रुवैः प्राप्यते हि ध्रुवं तत् ।
यतो मया नचिकेतश्चितोऽग्निरनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यम् ॥

**II. चतुर एव प्रश्नान् समाधत्त** **5x 4 =20**

१. ईशावास्योपनिषत् केन कदा दृष्टा ?

२. षट्प्रश्नोपनिषदि आश्वलायनेन कृतः प्रश्नः कः ?

३. नचिकेतसा वृतः प्रथमः वरः कः ?

४. वायोः व्यष्टिः इति नाम्नः आन्तर्यं विवृणुत ।

५. तलवकारोपनिषदि विद्यायाः आयतनत्वेन किङ्किं निर्दिष्टम् ?

६. छान्दोग्योपनिषदि स ह द्वादशवर्ष उपेत्य इति केनाभिप्रायेण निरूपितम् ?

–अनुवर्तते

**III. चत्वार्येव वाक्यानि सप्रसङ्गं व्याख्यात ।** **4x 5 =20**

१. एकमेवाद्वितीयं स्वगतभेदवर्जितं समानवर्जितं च ।

२. देहस्यैव शिरस्थस्य शिरो विष्णोः प्रतिष्ठितम् ।

३. 'नामरूपाद्विमुक्तः' इत्यनेनापि नामस्यामुक्तत्वमुच्यते । विप्रिय इत्यादिवत् ।

४. ततो बिभेति सर्वोऽपि न बिभेति हरिः स्वयम् ।

५. सर्वात्मना विजानामीति यस्य मतं भवेत् । तस्याज्ञातः स भगवान्....।

IV. छान्दोग्योपनिषदि प्रस्तुतं नवकृत्वोपदेशं वा बृहदारण्यकोपनिषदि प्रस्तुतं अन्तर्यामिब्राह्मणं वा अधिकृत्य निबन्धमेकं आरचयत । **10**

**V. चतुर्णामेव शब्दानां अर्थं सप्रमाणं लिखत ।** **4x 5 =20**

१. तद्वनम् ।

२. अरण्योर्निहितः इत्यत्र अरणी ।

३. ये के चात्महनो जनाः इत्यत्र आत्महनः ।

४. ऊर्ध्वपवित्रः ।

५. न तदश्नाति कश्चन इत्यत्र अश्नाति ।

६. प्रजाकामो वै प्रजापतिः इत्यत्र प्रजापतिः ।

—०—

Total No. of Questions : 5 ] [ Total No. of Printed Pages : 1

**Code No. : M-34**

# स्नातकपरीक्षाः—२०१४

## बि.ए. — विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्— द्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - २

### विषयः - तत्वोद्योतेत्यादि

**दिनाङ्कः** - 19-03-2014 ] **[ गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. यथारुचि द्वयोः टीकानुसारेण समाधानं कर्तव्यम् ।** **15 x 2 = 30**

१. मिथ्याशब्दाः अनिर्वचनीयं वदतीत्यत्र च ।

२. न च शून्यवादिनः सकाशाद्वैलक्षण्यं मायावादिनः ।

३. तद्विषयत्वमेव हि तदाकारत्वम् ।

**II. सङ्क्षेपेण द्वौ समाधेयौ** **10x 2 = 20**

१. ‘ ननु प्रश्नो न युज्यते इति कोऽर्थः’ विवृणुत ।

२. अनिर्वचनीयं ‘सत्वासत्वे’ इत्यनुमानेनापि न सिद्ध्यति -साधयत ।

३. ‘इष्टः’ इति विशेषणेन किमुक्तमाचार्यैः ?

**III. त्रयाणां टिप्पणीः रचयत ।** **5 x 3 = 15**

१. टीकामङ्गलपद्यम् २. असतः प्रतीतिः

३. अनिर्वचनीये अर्थापत्तिः ४. श्रुतीनामखण्डार्थनिष्ठत्वम्

**IV. यथेष्टं द्वौ समाधेयौ ।** **10x 2 = 20**

१.धर्माधर्मस्वरूपमधिकृत्य पदार्थसङ्ग्रहरीत्या विवृणुत ।

२. शक्तिस्वरूपं सविभागं सोदाहरणं निरूपयत ।

३. उपासनाविषये पदार्थसङ्ग्रहकर्तृणामाशयं विशदयत ।

**V. यथाङ्कमुत्तरत** **15**

१. नियतगुरवः के ? १

२. अहङ्कारतत्वं कतिविधम् ? किम् तत् ? २

—अनुवर्तते

| | |
|---|---|
| ३. प्रतिबिम्बो नाम कः ? | १ |
| ४. संस्कारः कतिविधः ? के ते | २ |
| ५.युगचतुष्टयं नाम्ना निर्दिशत | १ |
| ६.गुरवः कति ? के के ? | २ |
| ७.सत्यः सोऽस्य............विप्रराज्ये । पूरयत | २ |
| ८. नच बाष्पारोपितधूमेन.......व्यभिचरति-पूरयत | १ |
| ९. 'कुरुपाण्डवन्यायेन'- विवृणुत | ३ |

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : M-35**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– द्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - ३

### विषयः - गीतभाष्यम्, प्रमाणपद्धतिः तत्वसङ्ख्यानश्च

**दिनाङ्कः** - 20-03-2014 ] **[ गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. भाष्यटीकोक्तरीत्या द्वौ समाधेयौ** **2 x 10 = 20**

१. आगमस्यानुमानस्य च प्रामाण्यं ससन्दर्भं प्रतिपादयत ।

२ महाभारतस्य प्रामाण्यं प्रतिपाद्य तत्र निमित्तं विशदयत ।

३.' न च माययैकम्' ससन्दर्भं व्याख्यात ।

**II. श्लोकमेकं व्याख्यात** **1x 10 = 10**

१. देहिनोऽस्मिन् यथा देहे कौमारं यौवनं तथा ।
तथा देहान्तरप्राप्तिः धीरस्तत्र न मुह्यति ॥

२. कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूः मा ते सङ्गोऽस्त्वकर्मणि ॥

**III. ग्रन्थोक्तदिशा षट् प्रश्नाः समाधेयाः** **$2 \times 2^1/_2 = 15$**

१. कावुभौ निःश्रेयसकरौ ?

२. पुष्पितां वाचं के प्रवदन्ति ?

३. विषयाः कस्य विनिवर्तन्ते ? किं सर्वे ?

४. तान्यहं वेद सर्वाणि ,कः कानि ?

५. तथा तेनेदमावृतम्...यथा ?

६. उभयोरपि दृष्टोन्तः, कयोः ?

७. तस्य कार्यं न विद्यते । कस्य ?

८. सम्भवामि युगे युगे , कः ? किमर्थम्?

–अनुवर्तते

**IV. प्रमाणपद्धत्युक्तरीत्या चतुर्णामुत्तरं लिखत** **4 x10 = 40**

१. प्रमाणपद्धतिग्रन्थस्यानारम्भणीयत्वमाशङ्‌क्य निराकुरुत ।

२. अलक्षणं सदृष्टान्तं विवृणुत ।

३. नैय्यायिकोक्तं षड्विधं सन्निकर्षं सोदाहरणं विवृणुत ।

४. सदृष्टान्तं तर्कस्य पञ्चाङ्गानि वर्णयत ।

५. 'चतुष्ट्यां खलु धर्माणां गतिः' निरूपयत ।

६. इतरेषां प्रमाणलक्षणं निराकृत्य सिद्धान्तं प्रतिपादयत ।

**V. तत्वसङ्ख्यानोक्तरीत्या पञ्चानामुत्तरं देयम्** **5x3 = 15**

१. भावाभावत्वेन चेतनाचेतनत्वेन वा कुतः तत्वविभागः न कृतः ?

२. सदाभावः इति सञ्ज्ञाकरणे बीजं निरूपयत ।

३.संसर्गाभावस्य कुत्रान्तर्भावः ? कथम् ?

४. 'द्वेधैव चेतनम्' इत्यत्र एवकारार्थं प्रतिपादयत ।

५. अचेतनविभागं निरूपयत ।

६.भावाभावयोः लक्षणं लिखत ।

—०—

otal No. of Questions : 4 ] [ Total No. of Printed Pages : 1

**Code No. : M-36**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्धन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– द्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - ४

### विषयः - विष्णुतत्वनिर्णयः

**दिनाङ्कः** - 21-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. यथारुचि त्रयःसमाधेयाः** **15 x 3 =45**

१.'विशेषणानि यानि' पद्यमिदं सावतरणं व्याख्यात।

२. कार्यतावादमनूद्य निराकुरुत।

३. अन्योन्याश्रयादिनाभेदस्यैवायुक्तिं प्रसाध्य खण्डयत।

४. अवयवनियमः परार्थानुमानेऽपेक्षितो वा न वा ?मतान्तरविचारपूर्वकं स्वमतं स्पष्टयत।

**II. यथारुचि सङ्क्षेपेण त्रयः समाधेयाः** **10x 3 = 30**

१. चार्वाकेण लोकोपकारः कृतो वा न वा विमृशत।

२.'न चैतेषां वचनानामेवाप्रामाण्यम्' टीकानुसारं व्याख्यात।

३. श्रुति-वेद-आम्नायपदवाच्यत्वानुपपत्त्या वेदापौरुषेयत्वं साधयत।

४. प्रत्यभिज्ञायाः वर्णविषयकत्वमेवेति मतान्तरनिराकृतिपूर्वकं समर्थयत।

**III. यथारुचि त्रयाणां टिप्पणीः रचयत।** **5 x3 = 15**

१. अर्थापत्तिः २. अद्वैतश्रुतयः

३.टीकामङ्गलपद्यम् ४. वेदद्रष्टारः

**IV. अङ्गानुगुणमुत्तरत** **10**

१. नैषा तर्केण ...........। पूरयत १

२. 'लसतु.............कृन्तति' पूरयत २

३. वाचा विरूप नित्यया...........अर्थं लिखत। २

४. समयप्रयोजनाभावात्......अस्यार्थः कः ? २

५. प्रामाण्यपरतस्त्वसाधकानुमानसमन्वयं कुरुत। ३

—०—

Total No. of Questions : 6 ] [ Total No. of Printed Pages : 1

**Code No. : M-37**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– अद्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - १

### विषयः - उपनिषद्भाष्यम् - १

**दिनाङ्कः** - 18-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**सूचना - पञ्चैव प्रश्नाः समाधेयाः।**

**I.** उपासकानां प्रार्थना कीदृशी ? विलिखत। **20**

**II.** 'केनेषितं पतति प्रेषितं मनः' इत्यत्र ईषितप्रेषितशब्दयोः सार्थक्यं सम्यक् उपपादयत। **20**

**III.** उपनिषद्शब्दार्थं सम्यक् उपपादयत। **20**

**IV.** प्रश्नोक्तरीत्या सृष्टिप्रक्रियां विवृणुत। **20**

**V.** 'द्वा सुपर्णा सयुजा सखाया' मन्त्रं व्याख्यात। **20**

**VI.** 'पादाः मात्राः मात्राश्च पादाः' मन्त्रं विवृणुत। **20**

—०—

Total No. of Questions : 8 ] [ Total No. of Printed Pages : 1

**Code No. : M-38**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– अद्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - २

### विषयः - उपनिषद्भाष्यम् - २

**दिनाङ्कः** - 19-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**सूचना - अन्तिममनपहाय सप्त प्रश्नाः समाधेयाः ।**

I. 'अग्निर्वा भूत्वा मुखं प्राविशत्' मन्त्रेऽस्मिन् के के कुत्र कुत्र प्रविशन्ति ? ससन्दर्भं व्याख्यात । **15**

II. 'कतरः स आत्मा ? येन वा पश्यति येन वा शृणोति' अत्र अन्योन्यं कः पृच्छति ? विशदयत । **15**

III. 'सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयम्' सोदाहरणं प्रतिपादयत । **15**

IV. कः ईक्षां चक्रे ?मन्त्रपुरस्सरं तत्कथम् ऐक्षत इत्यादि विवृणुत । **15**

V. त्रिवृत्करणं ग्रन्थोक्तदिशा उपपादयत । **15**

VI. 'यत्र हि द्वैतमिव भवति' अत्र द्वैतस्य पारमार्थिकत्वं विद्यते न वेति विवेचयत । **15**

VII. के ग्रहाः के अतिग्रहाः ? उपनिषदनुसारं लिखत **15**

VIII. टिप्पणीः लिखत **2x 5 = 10**

१. शकुनिदृष्टान्तः

२.उपनिषदः

—०—

Total No. of Questions : 6 ] [ Total No. of Printed Pages : 1

**Code No. : M-39**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– अद्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - ३

## विषयः - भगवद्गीताभाष्यम्

**दिनाङ्कः** - 20-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I.** स्थितप्रज्ञस्य लक्षणं सङ्गृह्णीत। **15**

**II.** यज्ञभेदान् विलिख्य तेषु कस्य श्रेष्ठत्वमिति स्पष्टयत। **15**

**III.** भगवतः प्रियाः भक्ताः के ? विवृणुत। **15**

**IV.** ज्ञानसाधनानि कानि ? तानि विवृणुत। **15**

अथवा

तपसां त्रैविध्यं निरूपयत।

**V. श्लोकार्थं विलिखत** **2 X 10 = 20**

१. अशोच्यानन्वशोचस्त्वं................।

२. विद्याविनयसम्पन्ने...................।

**VI. भाष्योक्तं विशेषार्थं निरूपयत।** **2 X 10 = 20**

१. साङ्ख्यबुद्धिः २. जनार्दनः ३. परन्तप

४. कूटस्थः ५. पण्डितः ६. कृष्णः

७. ब्राह्मीस्थितिः ८.योगबुद्धिः ९. हृषीकेशः

१०.गुडाकेशः

—०—

Total No. of Questions : 6 ] [ Total No. of Printed Pages : 1

**Code No. : M-40**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– अद्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - ४

### विषयः - वेदान्तपरिभाषा

**दिनाङ्कः** - 21-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

I. मोक्षस्य परमपुरुषार्थत्वं सप्रमाणं निरूपयत । **15**

II. मनसः अनिन्द्रियतां प्रसाधयत । **15**

III. ज्ञानगतप्रत्यक्षं उपपादयत । **15**

IV. अनुमानप्रमाणं निरूप्य तृतीयलिङ्गपरामर्शं खण्डयत । **15**

अथवा

वाक्यजन्यज्ञाने कारणानि कानि ? विवृणुत ।

**V. सावतरणं व्याख्यात ।** **10**

देहात्मप्रत्ययोः यद्वत्प्रमाणत्वेन कल्पितः ।
लौकिकं तद्वदेवेदं प्रमाणं त्वाऽऽत्मनिश्चयात् ।।

**VI. पञ्चानामेव लघुटिप्पणीः लिखत ।** **5 x 6 = 30**

१. अर्थापत्तिः

२. अनुपलब्धिः

३. लिङ्गशरीरम्

४. वृत्तिः

५. मोक्षसाधनानि

६. प्रलयाः

—o—

Total No. of Questions : 6 ] [ Total No. of Printed Pages : 2

**Code No. : M-41**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– विशिष्टाद्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - १

### विषयः - उपनिषद्भाष्यम् - १

**दिनाङ्कः** - 18-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. एकेन वाक्येन समाधत्त** **1x10= 10**

१. तिस्रो रात्रिः अनश्नन् कः उवास ?

२. वैश्वानरः कुत्र प्रविशति ?

३. आशाप्रतीक्षे के ?

४. इष्टापूर्तं नाम किम् ?

५. शोकातिगः कुत्र मोदते ?

६. सृङ्का शब्दस्य कोऽर्थः ?

७. कः जन्ममृत्यू तरति ?

८. ब्रह्मजज्ञः कः ?

९. द्वितीयेन वरेण नचिकेतसा कीदृशो वरः वृतः ?

१०.पुरा देवैः कुत्र विचिकित्सितम् ?

**II मन्त्रोल्लेखनपूर्वकं मन्त्रार्थं विवृणुत।** **10x4= 40**

१.परीक्ष्य लोकान् कर्मचितान्............।

२. दिव्यो ह्यमूर्तः.......................।

३. आविः सन्ति हितम्.................।

४. न तत्र सूर्यो भाति....................।

**III. रिक्तस्थानानि पूरयत।** **1x10= 10**

१.मनुष्येषु प्रायणान्तं...........अभिध्यायीत ।

२..........इष्टापूर्ते पुत्रपशूँश्च..........।

–अनुवर्तते

३. अरा इव .......यस्मि् प्रतिष्ठिता।

४. ......देवानं प्रथमः सम्बभूव।

५. स भारद्वाजाय........प्राह।

६. यत् भूतयोनिं परिपश्यन्ति.....।

७. तथाक्षरात् सम्भवतीह.........।

८. तपसा चीयते........ततोऽन्नमभिजायते।

९. यः सर्वज्ञः सर्ववित् यस्य..........।

१०. एष वः पन्थाः.............।

**IV. समाधत्त** **10x4= 40**

१ 'द्वा सुपर्णा-' इति मन्त्रस्य अन्तःकरणजीवपरत्वं निराकुरुत।

२. षोडषकला भोक्तृत्वं परस्य वा जीवस्य वा विमृशत।

३. नचिकेतसा प्रार्थितः तृतीयो वरः कः विशदयत।

४. माण्डूक्ये प्रणवस्य माहात्म्यं कथं उपवर्णितम्? स्पष्टयत।

—०—

Total No. of Questions : 3 ] [ Total No. of Printed Pages : 1

**Code No. : M-42**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– विशिष्टाद्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - २

### विषयः - उपनिषद्भाष्यम् - २

**दिनाङ्कः** - 19-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. यथाभाष्यं उत्तरत** **2 x 10 = 20**

१.बाल्यपाण्डित्यवत् मौनस्यापि विधेयत्वं समाधत्त ।

२. सञ्ज्ञामूर्तिक्लृप्तिः परमात्मन एवेति समर्थयत ।

**II. मन्त्रं सम्पूर्य यथाग्रन्थं व्याख्यात ।** **5 x 10 = 50**

१. अन्योन्तर आत्माऽऽन्नमयः..........सन्तमेनं ततो विदुरिति ।

२. अन्नं न निन्द्यात्................अन्नँ राध्यते य एवं वेद ।

३. अम्भो मरीचिर्नरमापः........ता आपः ।

४. यत्रैतत्पुरुषः स्वपिति नाम....स्वं ह्यपीतो भवति ।

५. यद्वृक्षो वृक्णो रोहति......तिष्ठमानस्य तद्विदुः ।

**III. समाधत्त** **15 x 2 = 30**

१. 'तत्त्वमसि' इत्यत्र सामानाधिकरण्यस्वरूपं यथाग्रन्थं प्रपञ्चयत ।

२. ग्रहातिग्रहयोः स्वरूपं भाष्योक्तदिशा विशदयत ।

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : M-43**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– विशिष्टाद्वैतवेदान्तशास्त्रम्

### भागः -१, पत्रिका - ३

## विषयः - भगवद्गीताभाष्यम्

**दिनाङ्कः** - 20-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. एकेन वाक्येन समाधत्त** **1x10= 10**

१. युयुत्सवः कुत्र समवेताः ?

२. कुरुवृद्धः कः ?

३. कदा कुलधर्माः प्रणश्यन्ति ?

४. वर्णसङ्करः कदा जायते ?

५. के नानुशोचन्ति ?

६. सर्वं भगवति कथं प्रोतम् ?

७. गुणमयी माया कीदृशी ?

८. कदा ज्ञानवान् भगवन्तं प्रपद्यते ?

९. अल्पमेधसां फलं कथं भवति ?

१०. देवयजः कुत्र यान्ति ?

**II रिक्तस्थानानि पूरयत।** **1x10= 10**

१. कृत्स्नं जगत्..........व्याप्तम्।

२. मेघोदयः सागरसन्निवृत्तिः......।

३. सर्वाणि भूतानि कल्पक्षये.........यान्ति।

४. क्षेत्रज्ञानां कर्माणि......देवादिविषमभावहेतवः।

५. अथ यदतः परो दिवः....... ............।

६. ये च वेदविदो विप्राः..............।

–अनुवर्तते

७. पवित्राणां हि गोविन्दः............।

८. एष नारायणः श्रीमान्...... ।.........।

९. उपसंहर विश्वात्मन्...... ।...........।

१०. जातोऽसि देवदेवेश.........।...........।

**III. समाधत्त** **12x5= 60**

१. गीतावतरणस्य किं बीजमिति निरूपयत।

२. आत्मनां परस्परवैलक्षण्यं साधयत।

३.स्थितप्रज्ञतायाः स्वरूपं तद्भेदांश्च प्रपञ्चयत।

४य भगवदवतारयाथात्म्यं विशदयत।

५. सुकृतिनां स्वरूपं ज्ञानिनां श्रेष्ठं च साधयत।

**IV. टिप्पणीः रचयत** **5x4= 20**

१. अधियज्ञः

२. माया

३. शरीरम्

४. भक्तिविवृद्धिप्रकाराः

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : M-44**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– विशिष्टाद्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - ४

### विषयः - वेदार्थसङ्ग्रहः

**दिनाङ्कः** - 21-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. एकेन वाक्येन समाधत्त** **1x10= 10**

१. वेदान्तवाक्यजातं कुतः प्रवृत्तम् ?

२. प्रथमपक्षे दुष्परिहारान् दोषान् के उदाहरन्ति ?

३. आदेशशब्दार्थः कः ?

४. सर्वे शब्दाः कस्य वाचकाः ?

५. तृतीयशक्तिः का ?

६. अहङ्कारः कतिविधः ?

७. भगवत्प्रपत्तिमन्तरेण किं नोपपद्यते ?

८.चिच्छक्तियोगः कस्य ?

९. कया अमृतमश्नुते ?

१०. केषु कल्पेषु हरेः माहात्म्यं प्रकीर्त्यते ?

**II रिक्तस्थानानि पूरयत।** **1x10= 10**

१. सन्मूलाः सौम्य इमाः प्रजाः .........।........।

२.............................आप्नोति परम् ।

३.नान्यः पन्थाः...................।..........।

४. तदैक्षत बहु..................।............।

५.येनाश्रुतं श्रुतं भवति.............।...........।

–अनुवर्तते

६.वाचारम्भणं विकारो नामधेयं.........।..........।

७. वेदशब्देभ्य एव आदौ............।............।

८. तद्गुणसारत्वात्तु.............।...............।

९. ज्ञा अवबोधने इति सकर्मकः......।...............।

१०. अतः प्रामाणिकानां न केनापि प्रमाणेन..........।.........।

**III. समाधत्त** **12x5= 60**

१. मङ्गलपद्यं व्याख्यात ।

२. मतत्रयोपन्यासः कथं सङ्गृहीत ?

३. उपक्रमविरोधः कथमुद्भावितः आचार्यैः ?

४. 'तत्त्वमसि' श्रुतेः तात्पर्यं प्रपञ्चयत ।

५. तिरोधानानुपपत्तिः कथं साधितः भाष्यकारैः ।

**IV. टिप्पणीः रचयत** **5x4= 20**

१. वेदान्तवाक्यानां भेदनिरासपरत्वाभावः ।

२. शोधकवाक्यानां सविशेषपरत्रम् ।

३. सामानाधिकरण्यम् ?

४.एकजीववादः

—o—

Total No. of Questions : 8 ] [ Total No. of Printed Pages : 1

**Code No. : M-45**

# स्नातकपरीक्षाः—२०१४

## बि.ए. — विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्— शक्तिविशिष्टाद्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - १

### विषयः - उपनिषद्भाष्यम्

**दिनाङ्कः** - 18-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I.** ईशावास्यमित्यादि मन्त्राः ज्ञानकर्मसमुच्चयपराः इति अभिप्रायं उपनिषत्प्रमाणेन साधयत । **10**

**II.** 'न तत्र चक्षुर्गच्छति न वाग् गच्छति' इति मन्त्रं केनोपनिषदुक्तदिशा व्याख्यात । **10**

**III.** मुण्डकोपनिषद्भाष्योक्तरीत्या परविद्यास्वरूपं उपपादयत । **10**

**IV.** 'हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः' इति मन्त्रं महानारायणोपनिषदुक्तदिशा उपपादयत । **10**

**V.** 'क्षरं प्रधानं अमृताक्षरं हरः' इति मन्त्रं श्वेताश्वतरोपनिषदुक्तरीत्या सम्यक् व्याख्यात । **10**

**VI.** कैवल्योपनिषद्रीत्या माहेश्वरस्थलं प्रतिपादयत । **10**

**VII.** 'शिवनिन्दायां महान् प्रत्यवायः' इति सिद्धान्तशिखोपनिषद्रीत्या विवृणुत **10**

**VIII. षण्णामेव टिप्पणीः विलिखत ।** **6 x 5= 30**

१. तेन त्यक्तेन भुञ्जीथाः ।

२. आत्मा न विन्दते वीर्यं विद्यया अविन्दते अमृतम् ।

३. कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति ।

४. आर्द्रं ज्वलति ज्योतिरहमस्मि ।

५. अणोरणीयान् महतो महीयान् ।

६. शरणस्थलम् ।

७. लिङ्गधारी सदा शुचिः स्यात् ।

—०—

Total No. of Questions : 7 ] [ Total No. of Printed Pages : 1

**Code No. : M-46**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– शक्तिविशिष्टाद्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - २

## विषयः - लिङ्गधारणचन्द्रिका इत्यादि

**दिनाङ्कः** - 19-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**सूचना - अन्तिममनपहाय षट् समाधेयाः। सर्वे समाङ्काः।**

**I.** उपासनाविधिस्थले उपास्य-उपासना-उपासकानां त्रयाणामपि विधेयत्वेन अत्र उपासकः कः ? इत्याशङ्कां परिहरत। **15**

**II.** विधित्रयं सोदाहरणं सलक्षणं च उपपादयत। **15**

**III.** 'जातके मृतके वापि न त्याज्यं शिवपूजनम्' इति श्लोकभागं ससन्दर्भं व्याख्यात। **15**

**IV.** 'ओं नमो धारणं मे अस्तु' इति मन्त्रं लिङ्गधारणपरतया व्याख्यात। **15**

**V.** 'लिङ्गाङ्गसङ्गिनो वत्स पुनर्जन्म न विद्यते' इति पद्यभागं ग्रन्थोक्तदिशा ससन्दर्भं विवृणुत। **15**

**VI.** शिवाद्वैतमञ्जरीरीत्या वृक्षलक्षणं ससन्दर्भं विवृणुत। **15**

**VII.** एतेषु पञ्चानामेव टिप्पणीः विलिखत। **5x 5= 25**

१. पाणिमन्त्रम्।

२. षट्स्थलम्।

३. भावलिङ्गम्।

४. त्रिपुण्ड्रम्।

५. षड्वर्णं लिङ्गमुच्यते।

६. विरोधाधिकरणन्यायः

—०—

Total No. of Questions : 7 ] [ Total No. of Printed Pages : 1

**Code No. : M-47**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्धन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– शक्तिविशिष्टाद्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - ३

## विषयः - सिद्धान्तशिखामणिरित्यादि

**दिनाङ्कः** - 20-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

I. गुरुस्वरूपं महत्त्वं च सम्यक् उपपादयत। **12**

II. रुद्राक्षोत्पत्तिं तद्धारणफलं च ग्रन्थानुसारेण निरूपयत। **12**

III. परस्थलस्वरूपं महत्त्वं च ग्रन्थोक्तदिशा सम्यक् प्रतिपादयत। **12**

IV. जीवात्मस्वरूपं आत्मस्थलोक्तरीत्या निरूपयत। **12**

V. शक्तिस्वरूपं अनुभवसूत्रग्रन्थोक्तरीत्या विवृणुत। **12**

VI. परब्रह्मणः लक्षणं शिवाद्वैतपरिभाषाग्रन्थोक्तदिशा विचारयत। **12**

VII. **टिप्पणीः विलिखत।** **7 x 4= 28**

१. शिवयोगिशिवाचार्यः।

२. मलयपर्वतवर्णनम्।

३. नवविधभक्तिः।

४. षड्विधभक्तिः।

५. षड्विधलिङ्गस्थलम्।

६. पञ्चज्ञानेन्द्रियाणि।

७. शक्तिविशिष्टाद्वैतम्।

—०—

Total No. of Questions : 7 ] [ Total No. of Printed Pages : 1

**Code No. : M-48**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– शक्तिविशिष्टाद्वैतवेदान्तशास्त्रम्

### भागः - १, पत्रिका - ४

## विषयः - क्रियासार इत्यादि

**दिनाङ्कः** - 21-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I.** 'पतिधर्मा इमे ज्ञेयास्तदानन्तर्यमत्र च' इति ब्रह्मसूत्रवृत्युक्तरीत्या व्याख्यात । **12**

**II.** 'तत्तु समन्वयात्' इति सम्यक् प्रतिपादयत । **12**

**III.** 'सर्वत्र प्रसिद्धोपदेशात्' इति सूत्रं सम्यक् उपपदायत । **12**

**IV.** 'ध्यायेन्मुक्त्यै सदा देवं त्रिविधोपासनं स्मृतम्' इति विषयं ससन्दर्भं व्याख्यात । **12**

**V.** शिवार्पणतत्वज्ञानिनः आचारविधिं विवृणुत । **12**

**VI.** भक्तिस्वरूपं ग्रन्थोक्तदिशा निरूपयत । **12**

**VII.** एतेषां टिप्पणीः विलिखत । **7 x 4= 28**

१. दीक्षा ।

२. षट्स्थलम् ।

३. तदुपर्यपि बादरायणः सम्भवात् ।

४. आकाशस्तल्लिङ्गात् ।

५. वीरशैवार्चनक्रमम् ।

६. खननं श्रेष्ठमित्याहुरागमात् ।

७. प्रसादमहत्त्वम् ।

—०—

Total No. of Questions : 6 ] [ Total No. of Printed Pages : 1

**Code No. : M-49**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– जैनसिद्धान्तशास्त्रम्

### भागः - १, पत्रिका - १

### विषयः - न्यायीदपिका इत्यादि

**दिनाङ्कः** - 18-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

I. न्यायदीपिकाकर्तुः कालदेशादिकं लिखत। **15**

II. प्रमेयरत्नमालाग्रन्थस्य मङ्गलपद्यं विलिख्य विवृणुत **15**

III. 'हेतोरुपसंहार उपनयः' ग्रन्थोक्तदिशा विचारयत। **15**

IV. **इमौ श्लोकान् व्याख्यात।** **2 x 10= 20**

१. दर्शनस्मरणकारणकं सङ्कलनं प्रत्यभिज्ञानम्।
तदेवेदं तत्सदृशं तद्विलक्षणं तत्प्रतियोगीत्यादि ॥

२. गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनम्।
मानसं नास्तिताज्ञानं जायतेऽक्षानपेक्षया ॥

V. **इमानि सूत्राणि व्याकुरुत।** **4 x 5= 20**

१. प्रदीपवत्। २. तदनुमानं द्वेधा।

३. स देवदत्तो यथा। ४. परोक्षमितरत्।

VI. प्रामाण्यं स्वतः परतो वा ? विशदयत **15**

—०—

Total No. of Questions : 7 ] [ Total No. of Printed Pages : 1

**Code No. : M-50**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– जैनसिद्धान्तशास्त्रम्

### भागः - १, पत्रिका - २

## विषयः - बृहद्द्रव्यसङ्ग्रहः इत्यादि

**दिनाङ्कः** - 19-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I.** बृहद्द्रव्यसङ्ग्रहानुसारेण मोक्षस्वरूपं स्पष्टीकुरुत। **15**

**II.** ग्रन्थोक्तदिशा अष्टाविकल्पज्ञानोपयोगं प्रतिपादयत। **15**

**III.** बृहद्द्रव्यसङ्ग्रहग्रन्थस्य मङ्गलपद्यं विलिख्य व्याख्यात। **15**

**IV.** **निम्ननिर्दिष्टगाथयोः छायां विलिख्य अर्थं लिखत** **2 x 10= 20**

१. जीवमज्जीवं जिणवरवसहेण जेण णिद्दिष्टं।
दविन्दविन्दवन्दं वन्दे तं तव्वदा सिरसा॥

२. धम्माऽदम्मो कालो पुग्गलजीवा य संतिजावदिये।
आयासे सो लोगो हत्ता परदो अलोगत्ति॥

**V.** नवपदार्थाः के। विवृणुत। **15**

**VI.** एतयोः स्वरूपं विशदयत। **10**

१. सम्यग्दर्शनम् २. अजीवः

**VII.** द्रव्यास्रवस्वरूपं गाथापूर्वकं लिखत। **10**

—०—

Total No. of Questions : 8 ] [ Total No. of Printed Pages : 1

**Code No. : M-51**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्– जैनसिद्धान्तशास्त्रम्

### भागः - १, पत्रिका - ३

### विषयः - गोम्मटसारः

**दिनाङ्कः** - 20-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I.** जीवकाण्डप्रकरणं ग्रन्थोक्तदिशा प्रतिपादयत। **15**

**II.** काममार्गणास्वरूपं गाथापूर्वकं विवृणुत। **15**

**III.** ग्रन्थानुसारेण नारकादिगतिमार्गणास्वरूपं विशदयत। **15**

**IV.** गोम्मटसारग्रन्थस्य मङ्गलपद्यं विलिख्य विवृणुत। **15**

**V.** **इमौ श्लोकौ व्याख्यात।** **2x 10 = 20**

१. बलिस्नपननाट्यादि नित्यं नैमित्तिकं च यत्।
भक्ताः कुर्वन्ति तेष्वेव तद्यथास्वं विकल्पयेत्॥

२. यजेत देवं सेवेत गुरून् पात्राणि तर्पयेत्।
कर्म धर्म्यम् यशस्यं च यथालोकं समाचरेत्॥

**VI.** सम्यग्दर्शनस्य लक्षणसूत्रं विलिख्य व्याख्यात। **10**

**VII.** सागारधर्मामृतग्रन्थकर्तुः कालदेशादिकं लिखत। **15**

**VIII.** ग्रन्थोक्तदिशा कल्पद्रुमपूजालक्षणं विवृणुत। **10**

—०—

Total No. of Questions : 8 ] [ Total No. of Printed Pages : 1

**Code No. : M-52**

# स्नातकपरीक्षा:—२०१४

## बि.ए. — विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम्— जैनसिद्धान्तशास्त्रम्

### भागः - १, पत्रिका - ४

### विषयः - सागारधर्मामृतम्

**दिनाङ्कः** - 21-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

I. ग्रन्थानुसारेण सप्ताणुव्रतस्य स्वरूपं विवृणुत । **10**

II. 'सागारधर्मामृतम्' मङ्गलपद्यं विलिख्य विवेचयत । **15**

III. पञ्चाणुव्रतस्य लक्षणं विलिख्य श्रावकधर्मं विशदयत । **10**

IV. रात्रिभोजनत्यागस्य महत्त्वं ग्रन्थोक्तदिशा विचारयत । **10**

V. **इमौ श्लोकौ व्याख्यात** **2x 10 = 20**

१. जीवमज्जीवं जिणवरवसहेण जेण णिद्दिष्टं ।
दविन्दविन्दवन्दं वन्दे तं तव्वदा सिरसा ॥

२. धम्माऽदम्मो कालो पुग्गलजीवा य संतिजावदिये ।
आयासे सो लोगो हत्ता परदो अलोुगत्ति ॥

VI. **अनयोः गाथयोः भावां स्पष्टयत** । **2x 10 = 20**

१. एदे भावा णियमा देंसणमोहं पहुच्च भणिदा हु ।
चारित्तं णत्थि जदो अअअअविरदअंतेसु ष्ठाणेसु ॥

२.गुणजीवा पज्जत्ती पाणा सण्णा य मग्गणाओ य ।
उवओगोवि य कामसो वीसं तु परुवणा भणिदा ॥

VII. गोम्मटसारग्रन्थकर्तुः कालदेशादिकं लिखत । **10**

VIII. सिद्धानां स्वरूपं गाथापूर्वकं विवृणुत । **10**

—०—